श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीकामासिकाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकामासिकाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रुतीनामुत्तरं भागं वेगवत्याश्च दक्षिणम्।
कामादधिवसन् जीयात् कश्चिदद्भुतकेसरी॥ १ ॥

तपनेन्द्वग्निनयनः तापानपचिनोतु नः।
तापनीयरहस्यानां सारः कामासिकाहरिः॥ २ ॥

आकण्ठमादिपुरुषं
कण्ठीरवमुपरि कुण्ठितारातिम्।
वेगोपकण्ठसङ्गात्
विमुक्तवैकुण्ठबहुमतिमुपासे॥ ३ ॥

बन्धुमखिलस्य जन्तोः
बन्धुरपर्यङ्कबन्धरमणीयम्।
विषमविलोचनमीडे
वेगवतीपुळिनकेळिनरसिंहम्॥ ४ ॥

स्वस्थानेषु मरुद्गणान् नियमयन् स्वाधीनसर्वेन्द्रियः
पर्यङ्कस्थिरधारणाप्रकटितप्रत्यङ्मुखावस्थितिः।
प्रायेण प्रणिपेदुषां प्रभुरसौ योगं निजं शिक्षयन्
कामानातनुतादशेषजगतां कामासिकाकेसरी॥ ५ ॥

विकस्वरनखस्वरुक्षतहिरण्यवक्षःस्थली-
निरर्गळविनिर्गळद्रुधिरसिन्धुसन्ध्यायिताः।
अवन्तु मदनासिकामनुजपञ्चवक्त्रस्य माम्
अहम्प्रथमिकामिथःप्रकटिताहवा बाहवः॥ ६ ॥

www.prapatti.com

सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधि परिस्फुटद्भ्रुकुटिकेऽपि वक्त्रे कृते।
कृपा कपटकेसरिन् दनुजडिम्भदत्तस्तना
सरोजसदृशा दृशा व्यतिभिषज्य ते व्यज्यते॥ ७ ॥

त्वयि रक्षति रक्षकैः किमन्यैः
त्वयि चारक्षति रक्षकैः किमन्यैः।
इति निश्चितधीः श्रयामि नित्यं
नृहरे वेगवतीतटाश्रयं त्वाम्॥ ८ ॥

इत्थं स्तुतः सकृदिहाष्टभिरेष पद्यैः
श्रीवेङ्कटेशरचितैस्त्रिदशेन्द्रवन्द्यः।
दुर्दान्तघोरदुरितद्विरदेन्द्रभेदी
कामासिकानरहरिर्वितनोतु कामान्॥ ९ ॥

॥ इति श्रीकामासिकाष्टकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com